इति वसन्तराजशाकुने विचारिताः शुभावहाः॥
अथ नराङ्कितविचारः ।
"अथाभिधास्ये द्विपदेषु तावत्
प्रधानभावात् शकुनं नराणाम् ।
नैमित्तिकं यत् प्रतिभाय सर्व्वं
फलं शुभाशुभनयोर्ब्रवीति ॥
नरोऽभिरूपः सितवस्त्रमाल्यो
वाचं प्रशस्तां मधुराञ्च जल्पन् ।
एवंविधा योषिदपि प्रयाणे
प्रवेशकाले च करोति सिद्धिम् ॥*॥
वमद्विकेशो हतमानगर्व्वः
च्छिन्नाङ्गनग्नान्ध्यजतैलदिग्धाः ।
रजस्वला गर्भवती रुदन्ती
मलान्वितोन्मत्तजराधवाश्च ॥
दीनो द्विषत्कृष्णविमुक्तकेशाः
क्रमेलकस्थाः खरसैरिभस्थाः ।
सन्यासिसांक्रन्दनपुंसकाद्या
दुःखावहाः सर्व्वसमीहितेषु ॥*॥
पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो
वेश्या कुमारी सुहृदः सुकेशाः ।
नार्य्यो नराश्चाश्ववृषाधिरूढ़ाः
शुभाय दृष्टाः शकुनोद्यमेषु ॥*॥
कृष्णाम्बराः कृष्णविलेपनाढ्याः
कृष्णां स्रजं मूर्द्ध्नि विधारयन्ती ।
दृष्टा सकोपा यदि कृष्णवर्णा
नारी नरैस्तद्विपदो भवन्ति ॥*॥
श्वेताम्बरा श्वेतविलेपनाढ्या
मालां सितां मूर्द्ध्नि विधारयन्ती ।
दृष्टा प्रहृष्टा यदि गौरवर्णा
नारी नरैः स्यात्तदभीष्टसिद्धिः ॥
धृतातपत्रः सुविशुद्धवासाः
पुष्पान्वितश्चन्दनचर्च्चिताङ्गः ।
निश्चावयुक्तः कृतभोजनो वा
विप्रः पठन् यच्छति सर्व्वसिद्धिम् ॥
अभ्युपगच्छति यस्य हि याने
स्त्रीपुरुषोऽप्यथवा फलहस्तः ।
सर्व्वसमीहितसिद्धिरवश्यं
तस्य नरस्य भवत्यचिरेण ॥"
इति वसन्तराजशाकुने नराङ्कितेचित-संज्ञम् ॥ * ॥
"गच्छेति पृष्ठे पुरतस्तथैव
वाणीदृशी केनचिदुच्यमाना ।
सर्व्वाशिषश्चातिशयेन ताश्च-
श्चित्तस्य तुष्टिर्विजयाय पुंसाम् ॥
सिद्धा विरावा जहि छिन्धि भिन्धि
चेत्यादयः शत्रुवधोद्यतानाम् ।
क यासि मा गच्छत चैवमाद्याः
प्रयोजनारम्भनिवारणार्थाः ॥
स्थैर्य्ये स्थिरार्थाद्गमनं तदर्था-
द्वाक्यान्निवृत्तिर्विनिवर्त्तितार्थात् ।
लाभं जयं भङ्गममङ्गलं वा
बुध्येत तत्तत्प्रतिपादनार्थात् ॥

उग्रं भवेद्रोदनमग्रभागे
भयं भवेद्वह्निविभागभूते
नैरृत्यकोणे रणमार्गरोधो
वायव्यकोणे रुदितं सन्देहे ॥
मृत्युः सुतानां रुदितेन पृष्ठे
लाभो भवेत्तत्र निवर्त्तनेन ।
मृत्युस्तदाग्रे रुदितेन गन्तुः
सिद्धिं विधत्ते रुदितं रिपूणाम् ॥"
इति वसन्तराजशाकुने नराङ्किते उपश्रुति-प्रकरणम् ॥ * ॥ वकचक्रवाकटङ्कटिट्टिभकारण्डवभासभारद्वाजमयूरकपिञ्जल-लावकगृध्रोलूककपोतगोवत्सकुक्कुटकलविङ्कभारतीचासखञ्जनकाकपिङ्गलारूपाणि शकुनानि घोटकवृषमहिषखरगोमहिष्यजाजमेषैड़कोष्ट्रकुच्छुन्दरीमूषिकमार्जारवानरमृगवराहशकलासनकुलवृश्चिकपिपीलिकापल्ली-कुक्कुरादिरूपशकुनानिच वसन्तराजशाकुने द्रष्टव्यानि । हस्तिशशकमृगालषट्पदशरभसर्परूपाणि शकुनानि तत्तच्छब्दे द्रष्टव्यानि ॥
शकुनः, पुं, (शक + उनः ।) पक्षिमात्रम् । (यथा, महाभारते । १ । ७२ । १० ।
"तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ।
दृष्ट्वा शयानं शकुनाः समन्तात् पर्य्यवारयन् ॥")
पक्षिविशेषः । गृध्र इति ख्यातः । इति मेदिनी ॥ कश्यपपत्नीताम्रायाः श्येनगृध्रादयः पुत्राः । इति श्रीभागवतम् ॥ गृध्रस्याशुभफलं यथा,—
"वामेऽपसव्ये पुरतश्च पृष्ठे
युद्धं विभेदं मरणं क्षियश्च ।
गृध्रः स्थितः सन् कुरुते क्रमेण
शब्दोऽपसव्योऽस्य विपत्तिहेतुः ॥"
इति वसन्तराजशाकुनम् ॥
विप्रभेदः । इत्युणादिकोषः । तद्विवरणं भागवते उक्तम् । गीतविशेषः । तत्तु उत्सवादिषु मङ्गलार्थगेयम् । इत्यजयपालः ॥ शुभशंसी । इति शब्दरत्नावली ॥
शकुनज्ञा, स्त्री, (शकुनं जनातीति । ज्ञा + कः । स्त्रियामाप् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ शकुनज्ञातरि, त्रि ॥ (यथा, कथासरित्-सागरे । ३१ । ५३ ।
"प्राहिणोत्प्राङ्निषिद्धापि स्वसख्या शकुनज्ञया । स्वतन्त्रोऽभिनवारूढ़ो युवतीनां मनोभवः ॥")
शकुनिः, पुं, (शक्नोति उन्नेतुमात्मानमिति । शक + "शकेरुनोन्तोन्त्युनयः ।" उणा० ३।४६। इति उनिः ।) पक्षी । इत्यमरः ॥ (यथा, मनुः । ५ । ११ ।
"क्रव्यादान् शकुनीन् सर्व्वांस्तथा ग्राम-
निवासिनः ।
अनिर्द्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्जयेत् ॥")
चिल्लपक्षी । इति हेमचन्द्रः ॥ सौवलः । स तु कौरवमातुलः । (अयं हि दुर्य्योधनमन्त्री । द्यूते पाण्डवान् जित्वा वनं प्रेरयामास । असौ हि कौरवयुद्धे सहदेवेन निहतः । एतद्विवरणं महाभारते शल्यपर्व्वणि द्रष्टव्यम् ॥ ) ववाद्येकादशकरणान्तर्गताष्टमकरणम् । इति मेदिनी ॥ तत्करणजातफलम् ।
"परजनधनहर्त्ता वञ्चकः क्रूरचेष्टः
करधृतकरवालो व्याहतस्वामिपक्षः ।
अतिशयपरदारासक्तचित्तः सरोषो
भवति शकुनिजन्मा मानवः शीघ्रकर्म्मा ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
दुःसहपुत्त्रः । यथा,—
"दुःसहस्याभवत् भार्य्या निर्म्माष्टिर्नाम नामतः ।
जाता कलेस्तु पाभार्यां ऋतौ चण्डालदर्शनात् ॥
तयोरपत्यान्यभवन् जगद्व्यापीनि षोड़श ।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः ॥
दन्ताकृष्टिस्तथोक्तिश्च परिवर्त्तस्तथा परः ।
अङ्गधुक् शकुनिश्चैव गण्डप्रान्तरतिस्तथा ॥"
तस्य पञ्च पुत्त्रा यथा,—
"श्येनकाककपोतांश्च गृध्रोलूकौ च वै सुतान् ।
अवाप शकुनिः पञ्च जगृहुस्तान् सुरासुराः ॥
श्येनं जग्राह वै मृत्युः काकं कालो गृहीत-
वान् ।
उलूकं निरृतिश्चापि जग्राहातिभयावहम् ॥
गृध्रं व्याधिस्तदीशोऽथ कपोतञ्च स्वयं यमः ।
एतेषामेव चैवोक्ताः कृताः पापोपपादने ॥
तस्मात् श्येनादयो यस्य निलीयन्ते शिरस्यथ ।
तेनात्मरक्षणायालं शान्तिः कार्य्या द्विजोत्तम ॥
गेहे प्रसूतिरेतेषां तद्वन्नीड़निवेशनम् ।
न शस्तं वर्जयेन्गेहं कपोताक्रान्तमस्तकम् ॥
श्येनः कपोतो गृध्रो वा कौशिको वा गृहे
द्विजः ।
प्रविष्टः कथयन्त्यन्तं वसतां तत्र वेश्मनि ॥
ईदृक् परित्यजेद्गेहं शान्तिं कुर्य्याद्द्विजोत्तम ।
स्वप्नेऽपि हि कपोतस्य दर्शनं न प्रशस्यते ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिनामाध्यायः ॥*॥ विकुक्षिपुत्त्रः । यथा,—
"वैवस्वतमनोरासीदिक्ष्वाकुः पृथिवीपतिः ।
तस्य पुत्त्रशतं चासीद्विकुक्षिर्ज्येष्ठ उच्यते ॥
सोऽयोध्याधिपतिर्वीरस्तस्य पञ्चदश स्मृताः ।
शकुनिप्रमुखाः पुत्त्रा रक्षिता रोमहर्षिताः ॥"
इति वह्निपुराणे सगरोपाख्याननामाध्यायः ॥
शकुनिप्रपा, स्त्री, (शकुनीनां पक्षिणां पानार्थं या प्रपा ।) पक्षिणः पानीयशाला । तत्पर्य्यायः । शीग्रहः २ । इति हारावली ॥
शकुनी, स्त्री, श्यामापक्षी । इति राजनिर्घण्टः ॥ चटकी । इति केचित् ॥ (पक्षिरूपधारिणी पूतना । यथा, महाभारते । ५ । १३० । ४५ ।
"अनेन हि हता बाल्ये पूतना शकुनी तथा ।"
तथा च हरिवंशे । ६२ । १—२ ।
"कस्यचित्त्वथ कालस्य शकुनीवेशधारिणी ।
धात्री कंसस्य भोजस्य पूतनेति परिश्रुता ॥
पूतना नाम शकुनी घोरा प्राणिभयङ्करी ।
आजगामार्द्धरात्रे तु पक्षौ क्रोधात् विधु-
न्वती ॥"